5 ^{a}) V1 D6 कंपिल्यें; Dn3 कापिल्ये; D1 कास्मिलो (sic); D7 कांपील्ये; T1 G1. 2. 5 M कांबिल्ये (for काम्पिल्ये). — ^{b}) Ś1 K V1 B Da Dn1. n3 D1-3. 5. 8 त्वं(K5 ह्यं)तःपुर- (D1 °रे) (for अन्तःपुर-). D2. 3. 8 -निवासिनां (D8 °नं) (for °सिनी). — ^{c}) K4 D1 पूतनी (for पूजनी). K4. 5 B1 Dn1. n3 D2. 3. 8. 9 S (G3. 4 absent) शकुनिर् (for °नी). Da शकुनी पूजनी नाम. — ^{d}) K1. 5 दीर्घकाल- (for °कालं). Bo गृहोषिता; S (G3. 4 absent) सुखो° (for सहो°).

6 ^{a}) B4 damaged. K3 श्रुतज्ञा; Dn1 T2 ऋ° (for रु°). Bo D4. 9 T2 -सत्वानां (for -भूतानां). (for रु°). G1. 2 -जीविकः; M2 — ^{b}) D7 G2 तथा (for यथा).

C. 12. 5139
B. 12. 139. 7
K. 12. 139. 7

अभिप्रजाता सा तत्र पुत्रमेकं सुवर्चसम् ।
समकालं च राज्ञोऽपि देव्याः पुत्रो व्यजायत ॥ ७
समुद्रतीरं गत्वा सा त्वाजहार फलद्वयम् ।
पुष्ट्यर्थं च स्वपुत्रस्य राजपुत्रस्य चैव ह ॥ ८
फलमेकं सुतायादाद्राजपुत्राय चापरम् ।
अमृतास्वादसदृशं बलतेजोविवर्धनम् ।
तत्रागच्छत्परां वृद्धिं राजपुत्रः फलाशनात् ॥ ९
धात्र्या हस्तगतश्चापि तेनाक्रीडत पक्षिणा ।
शून्ये तु तमुपादाय पक्षिणं समजातकम् ।
हत्वा ततः स राजेन्द्र धात्र्या हस्तमुपागमत् ॥ १०
अथ सा शकुनी राजन्नागमत्फलहारिका ।
अपश्यन्निहतं पुत्रं तेन बालेन भूतले ॥ ११
बाष्पपूर्णमुखी दीना दृष्ट्वा सा तु हतं सुतम् ।
पूजनी दुःखसंतप्ता रुदती वाक्यमब्रवीत् ॥ १२

-जीवतः (for °कः). ❀ Cn: जीवजीवकः शाकुनिकः । स हि अयं पक्षी अस्यां दिशि लाभमस्यामलाभं दिशतीति वर्णयति । ❀ — c) K1 सर्वज्ञाः. B2 Da धर्म- (for सर्व-). K3. 5 V1 B1 Da Dn1. n3 D2. 3. 5. 8 -तत्त्वज्ञा; K4 -शर्मज्ञा (for -धर्मज्ञा). — d) K5 B4 Da Dn1. n3 D1-3. 8 -योनिं (for -योनि-). Da -गता च सा; G1 -कृतापि सः; M2 -गता अपि (for -गतापि सा).

7 a) K1 अपि प्रजाता; D4 अनिजातु तु (sic); D5 अभिजाता च (for °प्रजाता). — b) Bo. 3. 4 पुत्रं चैव (for पुत्रमेकं). — c) D9 -कालं तु; M2 -कालज्ञ- (for -कालं च). Da राज्ञापि; D9 वै राज्ञो. — d) K5 Bo. 3-5 Dn1. n3 D2. 3. 5. 7-9 T G2. 5 M1. 3. 4 देव्यां (for देव्याः). Ś1 K2. 4 [ऽ]भ्यजायत; D9 व्यजायते (for °यत). — After 7, K3. 5 V1 B Da Dn1. n3 D2. 3. 5. 8 ins. :

319* तयोरर्थे कृतज्ञा सा खेचरी पूजनी सदा ।

8 a) K5 B1 Da Dn1. n3 D2-4. 8 transp. गत्वा and सा. — b) K3. 5 B4 Dn1. n3 D2-5. 8 आजहार; V1 B1. 2 Da ह्याज°; D7 S (G3. 4 absent) जहाराथ (for त्वाजहार). — K3 om. 8cd. — c) V1 B1. 2 D7 T1 G2. 5 M स्वस्य; D4 श्वस्य (for च स्व-). D5 T2 G1 पुष्ट्यर्थं राजपुत्रस्य. — d) D5 T2 G1 स्वस्य; M2 राज्ञः (for राज-). K1 D4. 7 T1 G2. 5 चैव हि; V1 B2 Da चोभयोः (for चैव ह).

9 b) D1 M4 राजपुत्रस्य; T1 G5 M2 राज्ञः (M2 °ज्ञा) पुत्राय. — c) B1. 2 Da अमृतस्वादु- (B2 °द-); D5 आमृतं स्वादु-; D9 अमृतास्वादु- (for °स्वाद-). — d) K3. 5 B2. 4 Da Dn1. n3 D2. 3. 5. 7-9 -तेजोभि- (for -तेजोवि-). D4 तेजोबलविवर्धनं. — After 9cd, K3. 5 V1 B Da Dn1. n3 D2. 3. 5. 8 ins. :

320* आदायादाय सैवाशु तयोः प्रादात्पुनः पुनः ।

— c) K1 B4 Dn1. n3 D2. 3. 8. 9 ततः (for तत्र). M2 गच्छन्. K1 बुद्धिं; D4. 7. 9 S (G3. 4 absent) तृप्तिं (M2 प्रीतिं) (for वृद्धिं). — f) K2 D1 राजपुत्राः. D1 फलाशनं. — After 9, K3. 5 V1 B Da Dn1. n3 D2. 3. 5. 8 ins. :

321* ततः स धात्र्या कक्षेण उह्यमानो नृपात्मजः ।
ददर्श तं पक्षिसुतं बाल्यादागत्य बालकः ।

[(L. 1) Bo तत्र (for ततः). Da2 धात्रा. Da1 कर्षेण; Dn3 D2 कक्षेन; D8 कक्ष्येन. Dn1 ऊह्यमानो. — (L. 2) V1 B -शिशुं (for -सुतं). B4 damaged from बालकः up to हस्त (in 10a). K3 V1 B Da D5 तं चामार्ग (K3 °गृह्ण-; B2 D5 °मार्ज)त बालकः (for the post. half).]

10 B4 damaged up to हस्त. — a) Ś1 K1. 2. 4 D1 रात्रौ (for धात्र्या). K3 V1 Bo. 1. 3-5 Da Dn3 ततो धात्र्या प्रदत्ते (K3 °मुक्ते)न; K5 B2 Dn1 D2. 3. 5. 8 ततो बाल्याच्च यत्नेन. — b) D9 T2 G1 M क्रीड (M1 °डं)ति. — c) K5 शून्यं. K2. 3. 5 Dn1. n3 D2. 3. 8 च तम्; D7 M4 कृतम् (for तु तम्). Bo. 3. 4 शून्ये तु समुपादाय. — d) D1 समुजातकं. — e) D1 हत्वा (for ततः). D7 S (G3. 4 absent) तं (for स). — f) Ś1 K1. 2. 4 धात्री- (for धात्र्या). D9 सार्धम् (for हस्तम्). K2. 3. 5 Dn1. n3 D2. 3. 5 उपागतः; M3 अथागमत् (for उपा°).

11 a) K2. 3. 5 Dn1. n3 D2. 3. 5. 8 पूजनी (for शकुनी). K3 राजा (for राजन्). — b) K3 V1 Bo. 1. 5 Da आगम्य (for °मत्). K1 -हारिहा; K2. 5 B3 Dn1. n3 D2. 3. 5. 8 -हारिणी (for °का). D7 T G1. 2. 5 M आगमत्तत्र (D7 T1 G2. 5 °त्तात) भामिनी. — d) T1 G1. 2 भूपते (for भूतले).

12 a) B5 T2 G1 -मुखा (for -मुखी). G1 दीनां. — b) K1 सा तु सुतं; K5 Dn1. n3 D2. 3. 8 तं रुदती; Da D5 तु निहतं; D7 S (G3. 4 absent) सा (T2 G1 M4 तं) पतितं; D9 सा स्वसुतं (for सा तु हतं). D9

क्षत्रिये संगतं नास्ति न प्रीतिर्न च सौहृदम् ।
कारणे संभजन्तीह कृतार्थाः संत्यजन्ति च ॥ १३
क्षत्रियेषु न विश्वासः कार्यः सर्वोपघातिषु ।
अपकृत्यापि सततं सान्त्वयन्ति निरर्थकम् ॥ १४
अहमस्य करोम्यद्य सदृशीं वैरयातनाम् ।
कृतघ्नस्य नृशंसस्य भृशं विश्वासघातिनः ॥ १५
सहसंजातवृद्धस्य तथैव सहभोजिनः ।
शरणागतस्य च वधस्त्रिविधं ह्यस्य किल्बिषम् ॥ १६
इत्युक्त्वा चरणाभ्यां तु नेत्रे नृपसुतस्य सा ।
भित्त्वा स्वस्था तत इदं पूजनी वाक्यमब्रवीत् ॥ १७
इच्छयैव कृतं पापं सद्य एवोपसर्पति ।
कृतप्रतिक्रियं तेषां न नश्यति शुभाशुभम् ॥ १८
पापं कर्म कृतं किंचिन्न तस्मिन्यदि विद्यते ।
निपात्यतेऽस्य पुत्रेषु न चेत्पौत्रेषु नप्तृषु ॥ १९

C. 12. 5154
B. 12. 139. 22
K. 12. 139. 22

हृतं (for सुतम्). D4 सुतं हत्वा तु सा हतं. — c) Ś1 K4 D1 पूतनी (for पूजनी). — d) K3 D4 T G1. 5 रुदंती; D1 ददती.

13 Da1 om. 13a–14b. — a) Bo T G2. 5 M1. 3 संगतिर्; G1 °तिं (for °तं). D9 ज्ञात्वा (for नास्ति). — c) K3. 5 V1 B1. 2 Da2 Dn1. n3 D1–4. 8 कारणात् (for °णे). K3. 5 V1 B Da2 Dn1. n3 D1–5. 7. 8 S (G3. 4 absent) सांत्व(M2 श्वास)यंत्येते (for संभजन्तीह). D9 [पु]ते (for [इ]ह). — d) D4. 9 घातयंति (for संत्यजन्ति). K3 वा (for च).

14 Da1 om. 14ab (cf. v. l. 13). D5 om. 14. — b) K3. 5 V1 B1–3 Da2 Dn1. n3 D2. 3. 7. 8 S (G3. 4 absent) कार्यः सर्वापकारि(D7 T1 G2. 5 M °राधि)षु. — c) K1 T2 G1 अपकृत्वा (for °कृत्य). G1 हि (for [अ]पि). — d) V1 शांत्वयंति.

15 a) Bo. 3–5 D5 अहमद्य; D4 स्वयमथ; D7 S (G3. 4 absent) ह्य(G2 M2 °द)मद्य (for अहमस्य). V1 Bo. 3–5 D7 T1 G2. 5 M3. 4 [अ]स्य (for [अ]द्य). D9 करोम्यस्याहमप्यद्य. — b) Da D7 T2 G2 सदृशं; D1 सदृशे; D4 सदृशीर्. Da Dn3 G2 -यातनं (for °नाम्). — c) M1. 3 [अ]नृशंसस्य (for नृशं°). — d) D7 S (G3. 4 absent) नित्यं (for भृशं). K5 निश्वास-; D9 विश्वस्त- (for विश्वास-). Dn1 विश्वासपरिघातिनः.

16 D5 om. 16ab. — a) G1 damaged. D9 सम- (for सह-). S (G1 damaged; G3. 4 absent) -जातस्य (for -संजात-). — c) Hypermetric. B1 lacuna; D4 प्र- (for च). D1 बुधस् (for वधस्). D7 S (G3. 4 absent) शरण्यस्य वधश्चैवं (T2 G2 M4 °श्चैव; G1 °स्यैव; M1–3 °श्चेति). — d) B1 यस्य; D7 T G1. 2. 5 तस्य (for ह्यस्य). K3. 5 Dn1. n3 D2–5. 8 M त्रिविधं ह्येव (D4. 5 यस्य; M तस्य) पातकं; V1 B2 Da °धं यस्य कल्मषं.

17 D4 reads 17 after 18c. — a) K1 तच्छ्रुत्वा (for इत्युक्त्वा). B1 ते (for तु). — b) D7 T1 G2. 5 च; T2 M2. 3 वा; M1 सः (for सा). — c) K1 छित्वा (for भित्त्वा). Da2 D4 स्वस्थि(D4 °स्था)त* (for स्वस्था तत). Da1 भित्त्वा सस्थ तत मात्रं (sic); D7 S (G3. 4 absent) ह्(T2 G1 कृ)त्वा चैवांब(M2 °बु)-रस्थेदं. — d) Ś1 K4 D1 पूतनी; G1 पूजनीं.

18 a) K1 इच्छयैवं; K3. 5 V1 B D (Dn2 D6 absent) T G2. 5 M4 Cv °येह (D1 °यैव; D9 °येव); M1–3 °तेह (for °यैव). — b) M4 सत्य (for सद्य). Bo. 3. 4. 5 K2. 5 Dn1. n3 D2. 3. 8 तं च (for एव). Bo. 3. 4. 5 (marg. as in text) D5 [उ]पसज्जति; Cv °सर्पति (as in text). — c) K1. 2. 4 D2 कृतं; V1 कृते (for कृत-). V1 D7 S (G3. 4 absent) -कृतं (for -क्रियं). D2 om. प्रतिक्रियं. K3. 5 B Da Dn1. n3 D3–5. 8. 9 कृतं (Bo. 2. 3. 5 Da1 D4. 5. 9 कृते; B1 कृत-) प्रतिकृतं ये(Bo. 5 ह्ये)षां. — After 18e, D4 reads 17. — d) D3 तन् (for न). D1 M1. 3 नश्यंति.

19 a) V1 B1. 3. 5 Cv पापकर्म; Da पापपुण्य-; Dn1 पापं पुण्यं. M1–3 तेषां (for किंचिन्). — b) K3. 5 V1 Bo. 1. 3–5 Dn1. n3 D2. 3. 5. 7–9 S (G3. 4 absent) यदि तस्मिन्न (by transp.); B2 Da विततं तं न; D4 यास्मिंस्तस्मिन्न. K5 V1 B1. 2 Da Dn1. n3 D2. 3. 8. 9 दृश्यते (for विद्यते). — c) K5 Dn3 D2. 3. 5. 8 नृपते तस्य; Bo. 3–5 D4 निपात्य (D4 °त्ये-) तस्य; B2 °त्येते सु-; Da Dn1 निर्यांति (Dn1 °ति-) तस्य (for निपात्यतेऽस्य). — d) D9 पुत्रेषु (for पौ°). K3. 5 V1 B Da Dn1. n3 D2–5. 7. 8 S (G3. 4 absent) पौत्रेष्वपि च नप्तृषु (T2 G1 जनादिषु). — After 19, K3. 5 V1 B Da Dn1. n3 D2. 3. 5. 8 ins.:

322* ब्रह्मदत्तः सुतं दृष्ट्वा पूजन्या हृतलोचनम् ।
कृते प्रतिकृतं मत्वा पूजनीमिदमब्रवीत् ।

[(L. 2) V1 Bo वाक्यम् (for इदम्).]

C. 12. 5156
B. 12. 139. 24
K. 12. 139. 24

ब्रह्मदत्त उवाच ।

अस्ति वै कृतमस्माभिरस्ति प्रतिकृतं त्वया ।
उभयं तत्समीभूतं वस पूजनि मा गमः ॥ २०

पूजन्युवाच ।

सकृत्कृतापराधस्य तत्रैव परिलम्बतः ।
न तद्बुधाः प्रशंसन्ति श्रेयस्तत्रापसर्पणम् ॥ २१
सान्त्वे प्रयुक्ते नृपते कृतवैरे न विश्वसेत् ।
क्षिप्रं प्रबध्यते मूढो न हि वैरं प्रशाम्यति ॥ २२
अन्योन्यं कृतवैराणां पुत्रपौत्रं निगच्छति ।
पुत्रपौत्रे विनष्टे तु परलोकं निगच्छति ॥ २३
सर्वेषां कृतवैराणामविश्वासः सुखावहः ।
एकान्ततो न विश्वासः कार्यो विश्वासघातकः ॥ २४
न विश्वसेदविश्वस्ते विश्वस्तेऽपि न विश्वसेत् ।
कामं विश्वासयेदन्यान्परेषां तु न विश्वसेत् ॥ २५
माता पिता बान्धवानां वरिष्ठौ
भार्या जरा बीजमात्रं तु पुत्रः ।
भ्राता शत्रुः क्लिन्नपाणिर्वयस्य
आत्मा ह्येकः सुखदुःखस्य वेत्ता ॥ २६

---

20 a) D7 T1 G5 ते; G1 damaged (for वै). —b) K3 अस्मि (for अस्ति). M4 प्रतिकृतस् (for °कृतं). B3 मया (for त्वया). —c) K3 तं (for तत्). D7 T1 G5 समं (for समी-). —d) Ś1 K2.4 D1 पूतनि; K8 पूजनी. K3 गतः; D4.9 गम (for गमः).

21 Ś1 K1.4 D1 पूतनी (for पूजनी). — D9 om. 21^{ab}. —a) D5 मत्तः; M1 असकृत् (hypermetric) (for सकृत्). —b) K1 परिवत्स्यतः; G1 °लंबनं; M2.3 °लंबितः. —c) K3 बुद्ध्या; D1 बुधः (for बुधाः). —d) Dn3 श्रेयस्तत्त्वापतर्पणं (sic).

22 a) B4 G1 damaged. K5 B3 Dn1.n3 D2.3.8 सततं; V1 B1.2.5 (marg.) Da विकृते; D7 S (G1 damaged; G3.4 absent) विवृते (for नृपते). —b) Ś1 K1 कृतवैरेण; Da D7 S (G3.4 absent) वैरे (Da कृते) चैव (for कृतवैरे न). — D9 om. (hapl.) 22^{c}–25^{b}. —c) K2.3.5 V1 B Da Dn1.n3 D2.3.5.8 स (Dn3 D2.8 सं-) बध्यते; D4 स व°; D7 T G2.5 M स हन्यते; G1 संमन्यते (for प्रबध्यते). D4 पापो (for मूढो). —d) B1 वैरः; Da2 वर्णः. Da1 प्रसंशति; G2 प्रशाम्यते.

23 D9 om. 23 (cf. v. l. 22). —a) K5 V1 B (except B1) Da Dn1.n3 D2.3.7.8 S (G3.4 absent) अन्योन्य- (for °न्यं). —b) K3.5 V1 B Da Dn1.n3 D2.3.5.7.8 T1 G2.5 नियच्छति; D1 नि*च्छति; M1.3 न गच्छति (for निग°). M4 पुत्रपौत्राणि गच्छति. — Dn3 om. (hapl.) 23^{cd}. Ś1 reads 23^{cd} on marg. —c) D5 -पौत्र- (for -पौत्रे). K3 निविष्टे; B0.5 प्रनष्टे; G1 विनिष्टे (for विनष्टे). V1 B0–3.5 Da D5 च (for तु). K2.5 B4 Dn1 D2.3.8 पुत्रपौत्रविनाशे (Dn1 °शं) च. ❀ Cv: पुत्रे पौत्रे विनिर्माय कृतस्य प्रतिकृतं त्रिनिर्माय । ❀ — V1 reads 23^{d} on marg. G1 damaged. —d) D5 परं लोकं; M परलोके (for °लोकं). K2.5 V1 B Da Dn1 D2.3.5.7.8 T1 G2.5 नियच्छति; M4 [ऽ]नुगच्छति (for निग°).

24 D9 om. 24 (cf. v. l. 22). —a) M4 स तेषां (for सर्वेषां). —b) K3.5 V1 B1.2 Da Dn1.n3 D2.3.5.8 सुखोदयः (for सुखावहः). —d) D1 कार्यै. M3 विश्वस्त- (for विश्वास-). K3.5 V1 B Da Dn1.n3 D2.3.5.8 -घातकैः; D4.7 T1 G2.5 -घातके (for °कः).

25 = (var.) Ādi, App. I (No. 81), lines 125-126: 5. 38. 9: 12. 136. 138; 138. 43; Pañcatantra 2. 43; 4. 14. D9 om. 25^{ab} (cf. v. l. 22). —a) B4 damaged. M2 विश्वसेन्न अविश्वस्ते. —b) K1 D5 नापि; K2.3.5 V1 B Da Dn1.n3 D2.3.8 T2 G1 नाति- (for ऽपि न). — After 25^{ab}, Ś1 K Dn1.n3 D2.3.5.8 ins. (= [var.] 136. 136^{cd}):

323* विश्वासाद्भयमुत्पन्नमपि मूलं निकृन्तति ।

[Ś1 K4 विश्वस्ताद् (for विश्वासाद्). Ś1 K2.4 मूलान्यपि; D5 मूलादपि (for अपि मूलं).]

— D1 om. (hapl.) 25^{cd}. —c) G1 damaged. K4 विश्वसयेद्. —d) K1 न तु (by transp.); K2.5 B0 Dn1.n3 D2–4.8.9 च न; Da न सु-. — After 25, Ś1 K1.2.4 D1 (om. 25^{ab}).4.9 ins.:

324* अविश्वासात्परं हन्ति विश्वासाद्बध्यते परैः ।

[K4 विश्वासो. K4 D1 बाध्यते; D4 वन्यते (for वध्यते).]

26 a) D4 om. from माता up to क्लिन्न (in 26^{c}). Ś1 K2.4 transp. माता and पिता. —b) K5 D2 राजा; D7 S (G3.4 absent) क्षेत्रं (for जरा). B1 -मात्रस् (for °मात्रं). K1 V1 B D9 G1 पुत्राः; M1.3

अन्योन्यकृतवैराणां न संधिरुपपद्यते ।
स च हेतुरतिक्रान्तो यदर्थमहमावसम् ॥ २७
पूजितस्यार्थमानाभ्यां जन्तोः पूर्वापकारिणः ।
चेतो भवत्यविश्वस्तं पूर्वं त्रासयते बलात् ॥ २८
पूर्वं संमानना यत्र पश्चाच्चैव विमानना ।
जह्यात्तं सत्त्ववान्वासं संमानितविमानितः ॥ २९
उषितास्मि तवागारे दीर्घकालमहिंसिता ।
तदिदं वैरमुत्पन्नं सुखमास्स्व व्रजाम्यहम् ॥ ३०

ब्रह्मदत्त उवाच ।

यत्कृते प्रतिकुर्याद्वै न स तत्रापराध्नुयात् ।
अनृणस्तेन भवति वस पूजनि मा गमः ॥ ३१

पूजन्युवाच ।

न कृतस्य न कर्तुश्च सख्यं संधीयते पुनः ।
हृदयं तत्र जानाति कर्तुश्चैव कृतस्य च ॥ ३२

ब्रह्मदत्त उवाच ।

कृतस्य चैव कर्तुश्च सख्यं संधीयते पुनः ।

C. 12. 5170
B. 12. 139. 37
K. 12. 139. 37

पुत्रं (for पुत्रः). —^{c}) G1 वध्यस्य (for वयस्य). —^{d}) K5 Dn1. n3 D2–4. 7–9 S (G3. 4 absent) भोक्ता (for वेत्ता).

27 ^{a}) K3 B2 Da1 D5 M2 अन्योन्यं (for °न्य-). —^{b}) D4 पुनः संधिर्न विद्यते. — D1 om. 27^{c}–29^{b}. —^{c}) B4 damaged. Ś1 K1 न च; Da तस्य; M4 स हि (for स च). Ś1 K1. 2 अपक्रांतो; B4 damaged; M2 इति क्रांतो (for अतिक्रान्तो).

28 Cf. 43. D1 om. 28 (cf. v. l. 27). —^{a}) G2 पूजिताश्च (for °तस्य). Ś1 K1. 4 [आ]त्ममानाभ्यां; D5 [अ]नु°; Cv [अ]र्थ° (as in text). —^{b}) D7 T1 G2. 5 M स्यात्तु; T2 सांत्वं; G1 स*; Cv अंते (for जन्तोः). —^{c}) K2. 3. 5 V1 B1 Dn1. n3 D2. 3. 8 मनो; D7 T G1. 2. 5 M हृदयं (for चेतो). V1 भवत् (for भवति). K4 विश्वस्तं; D6 [अ]विश्वस्तः. Cv हृदय एव विश्वस्तं. —^{d}) K3. 5 V1 B D (D1 om.; Dn2 D6 absent) S (G3. 4 absent) Cv कर्म (T2 नरस्) (for पूर्वं). K1 श्रासयते; D4 त्राययत; D5 एवाश्रयाद् (for त्रासयते). K5 Da Dn1 D2. 3. 5. 7. 8 T1 G5 बलान् (for °त्). ❀ Cv: अर्थमानाभ्याम्, अर्थो मया आनीतफलादिदानम् । मानस्तव पुत्रे बहुमानः । ताभ्यां पूजितस्य । अन्ते अवसाने । पूर्वापकारिणः प्रथमं मम पुत्रवधकारिणस्तव हृदयं यद्यपि विश्वस्त तथापि कर्म, तव पुत्रनयनोत्पाटनाख्यं कर्म, बलान्मां त्रासयते इति योजना । ❀

29 D1 om. 29^{ab} (cf. v. l. 27). Dn3 om. 29–30. —^{a}) B1 पूर्व-. K1 M1. 3 यात्र (for यत्र). —^{b}) D4 वैव. K1 विमानिता; D2. 8 °नता; M2 °ननाः. —^{c}) K5 V1 Dn1 D1 तत्; T2 G1 स (for तं). D7 T1 G2. 5 बुद्धिमान्; D9 सर्वथा (for सत्त्ववान्). K2. 5 Dn1 D3. 5. 8 स्थानं (for वासं). K1 जह्यात्तत्रैव संवासं. —^{d}) G1 damaged. Bo. 3–5 D5 मानितश्च; D4 सन्मानित- (for संमा°). V1 B1. 2. 5 m -विमानितं; D5 [अ]विमानिनं (for -विमानितः). K2. 5 Dn1 D2. 3. 8 शत्रोः संमानितोपि सन्.

30 With 30, cf. Jātaka 343, Gāthā 1. Dn3 om. 30 (cf. v. l. 29). —^{b}) K3. 5 Dn1 D2. 3. 8 सम(D2. 8 °मा)र्चिता; D5 G1 M2 आहिंसता (M2 °का); D9 (marg.) अनिंदिता (for अहिंसिता). —^{d}) B4 damaged. T2 G1 स्वैरम् (for सुखम्). K1 आसु; K3. 5 V1 B (B4 damaged) Da D2. 3. 5. 8. 9 आशु; M2 आस्य; M4 आस (for आस्स्व).

31 With 31, cf. Jātaka 343, Gāthā 2. —^{a}) All MSS. (except Ś1 K1. 4 Dn3; B4 damaged; Dn2 D6 G3. 4 absent) यः (for यत्-). B5 हि (for वै). —^{b}) G1 damaged. M2 om. स. K3 B1 Da [अ]पराध्यते (Da °ति); K5 D4 °धवान्; D7 T G2. 5 M °ध्नुते (for °ध्नुयात्). —^{d}) Ś1 K1. 2. 4 D1 पूतनि; K3 पूजानिर्. K5 M3 गम.

32 With 32, cf. Jātaka 343, Gāthā 3. B1 om. (hapl.) 32 and 33 (with ref.). K1 om. the ref. Ś1 K1 (before corr.). 4 पूतनी (for पूजनी). —^{a}) Bo स कृतस्य; Da1 D1 न कृतश्च; M2 न तु तस्य; Cv न कृतस्य (as in text). K2. 5 B3. 4 Dn1. n3 D2. 3. 8 तु; K3 Bo. 5 D5 च (for the second न). K1 एनकृतस्य कर्तुश्च. —^{b}) K1 सुखं (for सख्यं). — After 32^{ab}, M2 reads 34^{ab} for the first time, repeating it in its proper place. K1 om. (hapl.) 32^{c}–33^{b}. V1 reads 32^{c}–33^{b} on marg. —^{c}) D1 तेत्र; D7 न व्य-; T1 G5 तस्य; G2 न वि-; M2 स्वेव (for तत्र). —^{d}) B2 Da1 वा (for च).

33 With 33, cf. Jātaka 343, Gāthā 4. K1 B1 om. 33 (cf. v. l. 32). V1 reads 33^{ab} on

C. 12. 5170
B. 12. 139. 37
K. 12. 139. 37

वैरस्योपशमो दृष्टः पापं नोपाश्नुते पुनः ॥ ३३

पूजन्युवाच ।

नास्ति वैरमुपक्रान्तं सान्त्वितोऽस्मीति नाश्वसेत् ।
विश्वासाद्बध्यते बालस्तस्माच्छ्रेयो ह्यदर्शनम् ॥ ३४

तरसा ये न शक्यन्ते शस्त्रैः सुनिशितैरपि ।
साम्ना ते विनिगृह्यन्ते गजा इव करेणुभिः ॥ ३५

ब्रह्मदत्त उवाच ।

संवासाज्जायते स्नेहो जीवितान्तकरेष्वपि ।
अन्योन्यस्य च विश्वासः श्वपचेन शुनो यथा ॥ ३६

अन्योन्यकृतवैराणां संवासान्मृदुतां गतम् ।
नैव तिष्ठति तद्वैरं पुष्करस्थमिवोदकम् ॥ ३७

पूजन्युवाच ।

वैरं पञ्चसमुत्थानं तच्च बुध्यन्ति पण्डिताः ।
स्त्रीकृतं वास्तुजं वाग्जं ससपत्नापराधजम् ॥ ३८

तत्र दाता निहन्तव्यः क्षत्रियेण विशेषतः ।
प्रकाशं वाप्रकाशं वा बुद्ध्वा देशबलादिकम् ॥ ३९

---

marg. — ^{a}) K_3 D_5 [ए]व च; Da चेह; D_1 चैवं; D_4 वैव; Cv नैव (for चैव). Bo. 3–5 D_5 सख्यं (for कर्तुश्च). — ^{b}) Bo 3–5 D_5 कर्तुः; Dn1. n3 $D_{2.3.8}$ कार्यं; D_1 सुखं (for सख्यं). — ^{d}) G_1 पापश्च; M_{1-3} फलं. K_5 नोपाश्नुतं; Da नो प्राप्नुते; T_2 G_1 M_1 चैवाप्नु- (M_1 °श्नु)ते; M_{2-4} चोपाश्नुते (for नोपा°). K_5 om. पुनः.

34 D_7 reads 34^{ab} and repeats 34^{cd}, T_1 $G_{2.5}$ M repeat, while T_2 G_1 read, 34 with ref. after 47^{ab}. $Ś_1$ $K_{1.4}$ D_1 पूतनी (for पूजनी). — ^{a}) Cv चैवम् (for वैरम्). $K_{3.5}$ V_1 B Da Dn1. n3 $D_{2-5.8.9}$ Cv अतिक्रांतं (for उप°). D_7 T $G_{1.2.5}$ M (all [except D_7 T_2 G_1] second time) नास्ति वैरस्य विश्वासः. — ^{b}) V_1 Bo. 1. 4. 5 शांत्वितो; $D_{4.9}$ T_2 G_2 $M_{1.2}$ (last three second time) सांत्विता. V_1 D_4 विश्वसेत्; T_2 M_2 (second time) वै नृप. — ^{c}) $Ś_1$ K_4 Dn3 D_1 बाध्यते; $D_{3.5.7}$ T_1 (last two both times). 2 G_2 (second time). 5 (both times) M_1 (second time). 2 (both times). 3 (second time). 4 (both times) वध्यते (for ब°). $K_{3.5}$ Dn3 $B_{1.3}$ $D_{2.3.5.7}$ (first time). 8 T_1 G_5 (both first time) लोके; V_1 B_2 Dn1 D_7 (second time) T_2 G_1 M (the last five both times) लोकस्; T_1 $G_{2.5}$ (all second time) तस्मात् (for बालस्). G_2 (first time) स्याद्बध्यते वैरिलोकस्. — ^{d}) G_1 तस्माज्ज्ञेयो; G_2 (second time) परं श्रेयं (for तस्माच्छ्रेयो). K_5 Dn1. n3 $D_{2.3.8}$ [ऽ]प्यदर्शनं; B_1 ह्यदर्शनः (for °र्शनम्). T_1 G_5 (both second time) श्रेयो ह्यदर्शनं परं.

35 = (var. 343*). T_2 om. 35–36. G_1 reads 35 after 62. — ^{a}) D_2 यं (for ये). Da गृह्यंते; D_5 शक्यंति. G_1 भिन्नाश्लिष्टा न शक्यंते. — ^{b}) B_1 G_1 शास्त्रैः (for शस्त्रैः). M_2 सं- (for सु-). — ^{c}) D_4 साम्ना स; M_2 सामांते (for साम्ना ते). $K_{3.5}$ V_1 B Da Dn1. n3 $D_{1-3.5.7-9}$ $M_{1.3}$ [ऽ]पि; D_4 न (for वि-). — ^{d}) K_1 एव (for इव).

36 T_2 G_1 om. 36 (for T_2, cf. v. l. 35). — ^{a}) D_5 विश्वासाज्; $M_{1.3}$ संवादाज् (for °साज्). — ^{c}) Bo. 5 D_5 तु; B_4 lacuna (for च). $Ś_1$ D_1 निश्वासः; V_1 संवासः (for विश्वासः). — ^{d}) D_7 T_1 G_2 M श्वानश्वपचयोरिव.

37 Before 37, D_4 M ins. पूजनी. — ^{b}) M_3 संन्यासान्; M_4 सांवा° (for संवा°). D_5 अनृतां (for मृदुतां). M_1 गतः. B_1 संवासान्मृदु चागतं; Da °सान्न गतागतं. — ^{c}) $D_{4.7.9}$ T_1 $G_{2.5}$ M_{2-4} नाव-; G_1 lacuna (for नैव). T_1 G_5 मद्- (for तद्). K_1 स्नेहं (for वैरं). ❀ Cv (reading नावतिष्ठति): अव अधस्ताच्छंसात्तिष्ठतीति न । ❀

38 K_3 $D_{4.7}$ S ($G_{3.4}$ absent) om. the ref. $Ś_1$ $K_{1.4}$ D_1 पूतनी (K_1 °ना) (for पूजनी). — ^{a}) K_1 पंचसमुक्तानां; Cv °स्थानं (as in text). — ^{b}) $Ś_1$ $K_{1.2.4}$ B_{3-5} Dn3 $D_{1.5.7.9}$ T_1 $G_{2.5}$ बुध्यंते तच्च (D_7 T_1 $G_{2.5}$ तत्र) पंडिताः. — ^{c}) D_1 स्वीकृत- (for स्त्रीकृतं). D_9 वाभुजं; $M_{1.3.4}$ वस्तुजं. ❀ Cv (reading अकृतं): अकृतं गोव्याघ्रयोरिव स्वभावकृतम् । ❀ — ^{d}) $Ś_1$ D_3 ससापत्नापराधजं; K_1 समपत्ना°; K_3 B_1 Da D_4 सा(Da स)पत्नमप°; K_4 D_1 M_2 स(M_2 स्व)संपन्नापराधजं (D_1 °जनं; M_2 °धजे); D_5 स सम्यन्नाप° (sic); D_7 T $G_{1.2.5}$ $M_{1.3.4}$ Cv स्वसपत्नापराधजं (D_7 °नं).

39 ^{a}) K_3 D_4 आदावेव; D_7 T_1 $G_{2.5}$ तत्र सर्वं; D_9 तत्र कर्ता (for तत्र दाता). $K_{2.5}$ Da2 Dn1. n3 $D_{1-3.8}$ $G_{1.2}$ न हंतव्यः (G_2 °व्यं); D_7 T_1 G_5 निहंतव्यं. — ^{c}) B_4 damaged. D_8 च (for वा). B_1 om. (hapl.) [अ]प्रकाशं वा. Dn1. n3 $D_{2.3.8}$ च (for वा). — ^{d}) D_1 बुद्ध्या. K_1 दोष- (for देश-). $K_{3.5}$ V_1 B D (Dn2 D_6 absent) S ($G_{3.4}$ absent)

कृतवैरे न विश्वासः कार्यस्त्विह सुहृद्यपि ।
छन्नं संतिष्ठते वैरं गूढोऽग्निरिव दारुषु ॥ ४०
न वित्तेन न पारुष्यैर्न सान्त्वेन न च श्रुतैः ।
वैराग्निः शाम्यते राजन्नौर्वाग्निरिव सागरे ॥ ४१
न हि वैराग्निरुद्भूतः कर्म वाप्यपराधजम् ।
शाम्यत्यदग्ध्वा नृपते विना ह्येकतरक्षयात् ॥ ४२
सत्कृतस्यार्थमानाभ्यां स्यात्तु पूर्वापकारिणः ।
नैव शान्तिर्न विश्वासः कर्म त्रासयते बलात् ॥ ४३
नैवापकारे कस्मिंश्चिदहं त्वयि तथा भवान् ।
विश्वासादुषिता पूर्वं नेदानीं विश्वसाम्यहम् ॥ ४४

ब्रह्मदत्त उवाच ।

कालेन क्रियते कार्यं तथैव विविधाः क्रियाः ।
कालेनैव प्रवर्तन्ते कः कस्येहापराध्यति ॥ ४५
तुल्यं चोभे प्रवर्तेते मरणं जन्म चैव ह ।
कार्यते चैव कालेन तन्निमित्तं हि जीवति ॥ ४६
बध्यन्ते युगपत्केचिदेकैकस्य न चापरे ।

C. 12. 8451
B. 12. 139. 51
K. 12. 139. 51

दोषबलाबलं.

40 Before 40, D$_{7}$ T G$_{2.5}$ ins. पूजनी. — ^{a}) Ś$_{1}$ K$_{4}$ Da$_{1}$ D$_{5}$ -वैरेण; D$_{7}$ S (G$_{3.4}$ absent) -पापे न; Cv -पापस्य (for -वैरे न). — ^{b}) B$_{2}$ Da$_{1}$ स्नेहः; T$_{2}$ स्वथ (for स्त्विह). K$_{3}$ D$_{4.9}$ कथंचन; B$_{2}$ सुहृत्स्वपि (for °द्यपि). — ^{c}) K$_{3}$ V$_{1}$ B D$_{4.5.7}$ S (G$_{3.4}$ absent) प्रच्छन्नं; D$_{1}$ छिन्नं सं· (for छन्नं सं·). — ^{d}) K$_{5}$ D$_{2.3}$ om. (hapl.) from दारुषु up to रिव (in 41^{d}).

41 K$_{5}$ D$_{2.3}$ om. up to रिव (cf. v. l. 40). — ^{a}) G$_{1}$ damaged. B$_{2}$ च वृत्तैर्; Da च वित्तेन (for वित्तेन न). D$_{7}$ S (G$_{1}$ damaged; G$_{3.4}$ absent) पौरुष्यान् (for पारुष्यैर्). D$_{5}$ पौरुषैर्न च वित्तेन. — ^{b}) B$_{1.2.4}$ शांत्वेन. D$_{5}$ श्रितैः (for श्रुतैः). B$_{3}$ Dn$_{1}$.n$_{3}$ D$_{7.8}$ T$_{1}$ G$_{5}$ न च सांत्वेन (D$_{8}$ °त्वैर्न) वा श्रु(B$_{3}$ श्रि)तैः. — ^{c}) Dn$_{1}$.n$_{3}$ D$_{8}$ कोपाग्निः; G$_{2}$ वैराग्यः (for °ग्निः). — ^{d}) Dn$_{1}$.n$_{3}$ D$_{8}$ तोयाग्निर् (for और्वा°). D$_{7}$ T$_{1}$ G$_{1.2.5}$ M$_{1}$ निमग्नोग्निरिवार्णवे; M$_{2-4}$ नौर्मग्नेव महार्णवे.

42 ^{a}) T$_{2}$ G$_{1}$ नापि (for न हि). K$_{2.4}$ उत्पन्नः; M$_{3}$ उद्भूतं. — ^{b}) B$_{4}$ damaged. Bo.$_{3-5}$ कृतं (for कर्म). K$_{3-5}$ Dn$_{1}$ D$_{2.3.5.8}$ T$_{2}$ च (for वा). K$_{3}$ अपराधजः. V$_{1}$ B$_{1.2}$ Da कर्म वाग(V$_{1}$ B$_{1}$ °ग्ज)पराधजः (Da °जं). — ^{c}) B$_{3}$ [अ]जग्ध्वा; D$_{8.9}$ [अ]दग्धा. K$_{3}$ V$_{1}$ B$_{1.2}$ Da D$_{4.7}$ S (G$_{3.4}$ absent) अदग्ध्वा शाम्यते नृणां. — ^{d}) K$_{1}$ ह्येकत्र न; K$_{4}$ ह्येकचर- (for ह्येकतर-).

43 Cf. 28. — ^{a}) D$_{1}$ सत्कृतस्य. B$_{1}$ Dn$_{3}$ [अ]न्व- (Dn$_{3}$ °नु)मानाभ्यां (for [अ]र्थ°). — ^{b}) K$_{3}$ D$_{4}$ पश्चात्; K$_{5}$ Dn$_{1}$.n$_{3}$ D$_{2.3.8}$ अनु-; D$_{7}$ S (G$_{3.4}$ absent) तत्र; D$_{9}$ शत्रोः (for स्यात्तु). G$_{2}$ सर्वापकारिणः. — ^{c}) V$_{1}$ B$_{1.2}$ Da Dn$_{1}$ D$_{4.9}$ न वै; D$_{4}$ damaged (for नैव). D$_{1}$ शांतिः. D$_{5}$ विश्वासात्. K$_{5}$ Dn$_{3}$ D$_{2.3.8}$ नादेयो मित्रविश्वासः. — ^{d}) V$_{1}$ B Da D$_{3.5.7}$ T$_{1}$ G$_{5}$ [ऽ]बलान्. G$_{1.2}$ कर्मणा जायते बलात्.

44 ^{a}) K$_{1}$ V$_{1}$ Da D$_{4}$ नैवोपकार्ये; K$_{2.3.5}$ B$_{1}$ Dn$_{1}$.n$_{3}$ D$_{2.3.8}$ नैवापकार्ये; Bo.$_{2-5}$ न चोपकार्ये; D$_{5}$ नोपकार्येपि; D$_{9}$ न वापि कार्ये; M Cv नैवोपकारे (for नैवा°). — ^{b}) K$_{3}$ D$_{4.7}$ यथा (for तथा). — ^{c}) K$_{5}$ V$_{1}$ B$_{1}$ Da Dn$_{1}$.n$_{3}$ D$_{2.3.8}$ उषितास्मि गृहेहं ते; D$_{7}$ T$_{1}$ G$_{2.5}$ उषितौ चावि(D$_{7}$ वावि-; G$_{2}$ वापि)चकितौ (T$_{1}$ G$_{5}$ °तं); T$_{2}$ उषितायावचरितं; G$_{1}$ °ता वाचि चकितं; M °ता यावच्चकितं (M$_{2}$ °ता).

45 ^{a}) D$_{1}$ कार्ये; D$_{4}$ सर्वं (for कार्यं). — ^{b}) Bo.$_{3-5}$ कालेन (for तथैव). D$_{4.7}$ (m as in text) Dn$_{1}$.n$_{3}$ D$_{2.3.8}$ G$_{1}$ प्रजाः (for क्रियाः). — ^{c}) K$_{2.5}$ Dn$_{1}$.n$_{3}$ D$_{2.3.8}$ G$_{1}$ [इ]ह [ए]ते; K$_{3}$ V$_{1}$ B (B$_{4}$ damaged) Da D$_{4.5}$ T$_{2}$ [इ]ह (for [ए]व). — ^{d}) D$_{7}$ T$_{1}$ G$_{1.2.5}$ कस्येति (for °ह). K$_{1.3}$ V$_{1}$ B$_{1.2}$ Da T$_{2}$ M$_{1.3.4}$ [अ]पराध्यते.

46 ^{a}) T G$_{1.2.5}$ तुल्ये (for तुल्यं). D$_{4}$ G$_{2}$ वोभे. K$_{4}$ Dn$_{3}$ D$_{2.4}$ G$_{1}$ प्रवर्तते; V$_{1}$ B$_{1.2}$ Da T$_{2}$ M$_{1-3}$ °र्तेतां (for °र्तेते). — ^{b}) K$_{1}$ transp. जन्म and चैव. D$_{5.7}$ T$_{1}$ G$_{2.5}$ M$_{2}$ हि; T$_{2}$ च; G$_{1}$ lacuna (for ह). — ^{c}) K$_{3}$ Bo.$_{3.4}$ D$_{8}$ M$_{2-4}$ कार्यंते; V$_{1}$ B$_{2}$ D$_{9}$ T$_{1}$ G$_{2.5}$ कार्येते (for कार्यते). D$_{4}$ नैक- (for चैव). Ś$_{1}$ K$_{1.4}$ D$_{1}$ बालेन (for कालेन). — ^{d}) K$_{3.5}$ V$_{1}$ B Da Dn$_{1}$.n$_{3}$ D$_{2.3.5.8}$ न; Da$_{2}$ (also) D$_{4.7}$ S (G$_{3.4}$ absent) च (for हि). Ś$_{1}$ K$_{1.2}$ D$_{9}$ जीवितं (for जीवति).

47 ^{a}) D$_{2}$ बाध्यंते; T$_{1}$ G$_{5}$ M$_{3.4}$ वध्यंते. — ^{b}) Da केचिदेकैकशो न D$_{1.4.9}$ एकैकश्येन (for °स्य न). D$_{7}$ S (G$_{3.4}$ absent) एकैकं च प(T$_{2}$ G$_{1}$ M चाप)रे तथा. — After 47^{ab}, D$_{7}$ reads 34^{ab} and repeats 34^{cd}, T$_{1}$ G$_{2.5}$ M repeat, while T$_{2}$ G$_{1}$ read

C. 12. 5184
B. 12. 139. 51
K. 12. 139. 51

कालो दहति भूतानि संप्राप्याग्निरिवेन्धनम् ॥ ४७
नाहं प्रमाणं नैव त्वमन्योन्यकरणे शुभे ।
कालो नित्यमुपाधत्ते सुखं दुःखं च देहिनाम् ॥ ४८
एवं वसेह सस्नेहा यथाकालमहिंसिता ।
यत्कृतं तच्च मे क्षान्तं त्वं चैव क्षम पूजनि ॥ ४९

पूजन्युवाच ।

यदि कालः प्रमाणं ते न वैरं कस्यचिद्भवेत् ।
कस्मात्त्वपचितिं यान्ति बान्धवा बान्धवे हते ॥ ५०
कस्माद्देवासुराः पूर्वमन्योन्यमभिजघ्निरे ।
यदि कालेन निर्याणं सुखदुःखे भवाभवौ ॥ ५१
भिषजो भेषजं कर्तुं कस्मादिच्छन्ति रोगिणे ।
यदि कालेन पच्यन्ते भेषजैः किं प्रयोजनम् ॥ ५२
प्रलापः क्रियते कस्मात्सुमहाञ्शोकमूर्छितैः ।
यदि कालः प्रमाणं ते कस्माद्धर्मोऽस्ति कर्तृषु ॥ ५३
तव पुत्रो ममापत्यं हतवान्हिंसितो मया ।
अनन्तरं त्वया चाहं बन्धनीया महीपते ॥ ५४

---

34 (with ref.). Before 47[cd], D7 S (G3. 4 absent) ins. ब्रह्मदत्त उवाच. — [c]) D1 काले. — [d]) D7 T1 G1. 2. 5 M संप्राप्तो (for °प्य). K4 इह (for इव).

48 [a]) D9 वैवश्वम् (sic); D9 (marg.) वैरस्य ; G1 देवत्वम् (for नैव त्वम्). — [b]) K2. 3. 5 B1–4 Dn1. n3 D2. 3. 5. 7. 8 S (G3. 4 absent) अन्योन्यं (for °न्य-). K1. 2 Bo Da -कारणे ; K3. 5 B3 Dn1. n3 D2. 3. 5. 7. 8 S (G3. 4 absent) कारणं (M4 °णा) (for -करणे). — [c]) D1 काले. G1 दत्तम् (for नित्यम्). K1. 5 V1 B1–3 D (Dn2 D6 absent) S (G3. 4 absent) उपादत्ते (for °धत्ते). K3 कालो दत्ते महाभागे. — [d]) T2 G1 दुःखा-दुःखं ; M2 सुखदुःखं. D1 देहिनं.

49 [a]) D4 सुखं (for एवं). V1 वसैव. K4 संस्नेहा ; Dn3 D3 मत्स्नेहा ; D5 lacuna (for सस्नेहा). — [b]) K2. 3. 5 B3. 4 Dn1 D1–5. 8. 9 M -कामम् (for -कालम्). G1 अहिंसितं ; M2 °सया — [c]) M2 त्वत् (for यत्). K3. 5 B3. 4 Da2 Dn1. n3 D2. 3 तत्तु मे ; Da1 तव मे ; D7 S (G3. 4 absent) ते (M2 तु) मया ; D8 तं तु मे (for तच्च मे). D4 ज्ञातं (for क्षान्तं). K4 यत्कृतं तश्च मोक्षांतं. — [d]) K3–5 B3 Dn1. n3 D2. 3. 8 च वै ; Da2 चर ; D4 वैव ; D9 अपि (for चैव). Ś1 K1. 4 पूतनि ; D1 पूतशे ; T2 G2 M2 पूजनी (M2 °निः). D5 क्षमस्व च सुपूजनि.

50 Ś1 K1 D1 पूतनी. — [a]) Ś1 K2 कालो यदि (by transp.); K4 काले यदि ; G1 यदि कालं. — [b]) D5 चिरं (for वैरं). — [c]) Bo G2 तस्माद् (for कस्मात्). K3 V1 B1. 2 Da D7 T1 G2. 5 व्यपचितिं (B2 °तं); Bo D5 उप° ; D2. 8 त्वपचितं ; D4. 9 T2 G1 ह्य(D9 ह्या)पचितिं ; M ह्यप° (for त्वप°). D4 om. यान्ति. — [d]) G1 बांधवा (for °वे). K3. 5 B3 Da2 Dn1. n3 D2. 3. 8 बांधवा बांधवैर्हतैः.

51 D1 om. 51[a]–52[b]. — [a]) M3 तस्माद् (for क°). D7 S (G3. 4 absent) सर्वे (for पूर्वम्). — [b]) M4 ह्यन्योन्यम्. — [c]) D5 कार्येण (for कालेन). K1 निर्याणां ; D4 निपुणं. — [d]) B4 damaged. K5 B3. 5 Dn1 n3 D2. 3. 8 M4 सुखं दुःखं (M4 °खे); M2 सुख-दुःखौ (for °दुःखे).

52 D1 om. 52[ab] (cf. v. l. 51). — [a]) K3 भेषजो ; D4 भिषजेर्. Ś1 K (except K5) B2. 3 D3. 5 भैषजं ; B4 damaged (for भेषजं°). — [b]) M2 तस्माद् (for क°). K5 B3 Dn1. n3 D2–4. 8. 9 G1 रोगिणः (for °णे). — D2 om. (hapl.) 52[c]–53[b]. — [c]) K1. 2 D1 पश्यंते ; D4 युज्यंत (for पच्यन्ते). — [d]) D1. 4 भि(D1 भै)षजैः.

53 D2 om. 53[ab] (cf. v. l. 52). — [ab]) D4 प्रालापः. All MSS. (except Ś1 K1. 2. 4 B2 D5 M3 ; D2 om. ; Dn2 D6 G3. 4 absent) transp. क्रियते and सुमहान्. M2 तस्मात् (for क°). D4 om. (hapl.) from मूर्छितैः up to कालः (in 53[c]). D5 -मूर्छितः ; D9 -कर्शितैः ; M2 -मूषितैः. — [c]) D9 G1 M4 काल- (for कालः). K3 च (for ते). — [d]) Bo. 4. 5 पापानि ; M4 धर्मोस्ति. D5 कस्यचित् (for कर्तृषु).

54 D9 reads 54 on marg. — [b]) K3. 5 V1 B Da Dn1. n3 D2. 3. 5. 8 स हतो (for हिंसितो). M1. 3 पुनः (for मया). — [c]) K3. 5 V1 B1–4 Da Dn1. n3 D3. 8 [अ]हं च (by transp.); D2 lacuna ; D4 वाहं. — [d]) B4 damaged. D4. 7 S (G3. 4 absent) बाधितव्या (for बन्धनीया). D5 महामते (for महीपते). K3. 5 B3 Dn1. n3 D2. 3. 8 हंतव्या हि नराधिप ; V1 B1. 2 Da निहंतव्या नराधिप.

55 [c]) K3 अथ ; K5 V1 B Da Dn1. n3 D2. 3. 5. 8 T2 G1 यथा (for तथा). K1 D9 प्रकर्तव्यं (for प्रह°).

अहं हि पुत्रशोकेन कृतपापा तवात्मजे ।
तथा त्वया प्रहर्तव्यं मयि तत्त्वं च मे शृणु ॥ ५५

भक्षार्थं क्रीडनार्थं वा नरा वाञ्छन्ति पक्षिणः ।
तृतीयो नास्ति संयोगो वधबन्धादृते क्षमः ॥ ५६

वधबन्धभयादेके मोक्षतन्त्रमुपागताः ।
मरणोत्पातजं दुःखमाहुर्धर्मविदो जनाः ॥ ५७

सर्वस्य दयिताः प्राणाः सर्वस्य दयिताः सुताः ।
दुःखादुद्विजते सर्वः सर्वस्य सुखमीप्सितम् ॥ ५८

दुःखं जरा ब्रह्मदत्त दुःखमर्थविपर्ययः ।
दुःखं चानिष्टसंवासो दुःखमिष्टवियोगजम् ॥ ५९

वैरबन्धकृतं दुःखं हिंसाजं स्त्रीकृतं तथा ।
दुःखं सुखेन सततं जनाद्विपरिवर्तते ॥ ६०

न दुःखं परदुःखे वै केचिदाहुरबुद्धयः ।
यो दुःखं नाभिजानाति स जल्पति महाजने ॥ ६१

यस्तु शोचति दुःखार्तः स कथं वक्तुमुत्सहेत् ।
रसज्ञः सर्वदुःखस्य यथात्मनि तथा परे ॥ ६२

C. 12. 5199
B. 12. 139. 66
K. 12. 139. 66

— [d]) K2.3.5 V1 B1.2 Dn1 n3 D2.3.8 तथा (for मयि). D7 तत्त्वेव (for तत्त्वं च). K3 वचः; D4.9 हि मे (for च मे). Bo.3–5 D5 तथा त्वं मे वचः शृणु; Da तथा त्वं च शृणुष्व मे.

56 [a]) V1 B1 D1 भक्ष्यार्थं; D5 पक्षार्थं. K4.5 Dn1.n3 D2.3.8 च (for वा). — [b]) K3 V1 Bo.4.5 D5 पक्षिणं (for °णः). B1.2 Da D4 M पक्षीनिच्छंति मानवाः (Da पक्षिणः); T1 G1.2.5 नर इच्छ(G2 °च्छं)ति पक्षिणः. — [d]) B1 क्षमाः; M2 क्षमं. D4 वधाद्वधादृतक्षमः (sic).

57 [a]) T2 अथ (for वध-). K2.3.5 V1 B Da Dn1.n3 D1.3.5.8 एते (for एके). — [b]) Da लोक्यं (for मोक्ष-). T1 G1.5 -तत्त्वम् (for -तन्त्रम्). K3.5 V1 B1–4 Da Dn1.n3 D2.3.7.8 T1 G1.5 उपाश्रिताः (for °गताः). G2 मोक्ष्यंते त्वामुपाश्रिताः. — [c]) Ś1 D1 मरणोत्पादजं दुःखम्; K3 V1 Bo–2.4.5 Da1 D7 S (G3.4 absent) जाती(Da1 जातिं; D7 T1 G1.2.5 जनी-; T2 जाते)मरणजं दुःखम्. — [d]) D8 om. (hapl.) from आहु up to दुःखं (in 59[a]). K5 B3 Dn1.n3 D2.3.5.9 प्राहुर् (for आहुर्). K1.3.5 V1 B Da Dn1.n3 D2–5.9 वेदविदो (for धर्म°). D7 S (G3.4 absent) इत्याहुर्विदुषो जनाः.

58 D8 om. 58 (cf. v. l. 57). — [a]) G1 ददतः (for दयिताः). — [c]) T2 उद्व्यथते (for उद्विजते). V1 D7 T G1.2.5 M2 सर्वं. — [d]) D4 सर्वः सुखमभीप्सति.

59 D8 om. up to दुःखं (in 59[a]) (cf. v. l. 57). — [a]) D5 om. (hapl.) 59[a]–60[b]. M1 ब्रह्मदत्तं. — [b]) Bo.3.5 सर्व- (for अर्थ-). T2 G1 -विपर्ययं. — [c]) Ś1 K2.4 D1 दुःखो हि; K1 V1 Da2 D9 दुःखश्च; Da1 D4 दुःखस्य (for दुःखं च). — [d]) T2 अर्थ- (for इष्ट-). K3 V1 Bo.2 Da Dn1.n3 D1–3.8 -वियोजनं (for °गजम्).

60 D5 om. 60[ab] (cf. v. l. 59). — [a]) K3.5 V1 B1.2 Da Dn1.n3 D2.3.8 वध- (for वैर-). — [b]) Bo.3–5 सहजं (for हिंसाजं). K3.5 V1 B1.2 Da Dn1.n3 D2.3.7.8 S (G3.4 absent) स्त्रीकृतं सहजं तथा (K3 D2.3.8 यथा; G1 तदा); D4 वैरं हि सहजं तथा. — [c]) D4.9 सुखं (for दुःखं). K5 Dn1.n3 D2.3.8 सुतेन; D4.5.7.9 S (G3.4 absent) दुःखेन (for सुखेन). T2 G1 सहजं (for सततं). — [d]) K5 D5 जनार्थे Bo.3–5 Dn1.n3 D2.3.8 जनान्वि-; (for जनाद्वि-). K3 V1 B1.2 D4 निवर्तंति (K3 °र्तंत; D4 °र्तय) जनाधिप; D7 S (G3.4 absent) विवर्धंति नराधिप.

61 B4 damaged for 61[ab]. — [a]) V1 B1.2.5 D5.7 T1 G1.2.5 -दुःखं वै; Da1 -दुःखेषु (for -दुःखे वै). K3 Bo.3 न दुःखं परमं दुःखं; D4 न दुःखं न सुखं चापि; T2 M न (M1.3 सु-) दुःखं परमन्वे(T2 °न्ये)ति. — [c]) M2 ये दुःखं नाभिजानंति. — [d]) Ś1 K1.2.4 D1.4.9 T2 G1.2 M1.3.4 न (for स).

62 D7 S (G3.4 absent) transp. 62[ab] and 62[cd]. — [a]) K3 यः सु-; B1 यश्च (for यस्तु). D9 जल्पति (for शोचति). D1 दुःखांतः. D4 दुःखार्तः सत्कथं वस्तुम्. — [b]) K1.4 Da Dn3 D1.9 T2 G2 वस्तुम् (for वक्तुम्). K2 उत्सहे. D4 उत्सहेत कथंचन. —After 62[ab], D7 T G2.5 M ins. ([var.] 35):

343* भिन्नाः श्लिष्टा न शक्यन्ते शस्त्रैः सुनिशितैरपि ।
साम्ना तेऽपि निगृह्यन्ते गजा इव करेणुभिः ।

[(L. 1) T2 क्लिष्टा (for श्लिष्टा). —(L. 2) T2 M2 विनि-; M1.3 हि नि-; M4 [ऽ]पि न (for ऽपि नि-).]
— T2 G1 M4 read 62[cd] twice. — [c]) T2 (second

C. 12. 5200
B. 12. 139. 67
K. 12. 139. 68

यत्कृतं ते मया राजंस्त्वया च मम यत्कृतम् ।
न तद्वर्षशतैः शक्यं व्यपोहितुमरिंदम ॥ ६३
आवयोः कृतमन्योन्यं तत्र संधिर्न विद्यते ।
स्मृत्वा स्मृत्वा हि ते पुत्रं नवं वैरं भविष्यति ॥ ६४
वैरमन्तिकमासज्य यः प्रीतिं कर्तुमिच्छति ।
मृन्मयस्येव भग्नस्य तस्य संधिर्न विद्यते ॥ ६५
निश्चितश्चार्थशास्त्रज्ञैरविश्वासः सुखोदयः ।
उशनाश्चाथ गाथे द्वे प्रह्लादायाब्रवीत्पुरा ॥ ६६
ये वैरिणः श्रद्दधते सत्ये सत्येतरेऽपि वा ।
ते श्रद्दधाना वध्यन्ते मधु शुष्कतृणैर्यथा ॥ ६७
न हि वैराणि शाम्यन्ति कुलेष्वा दशमाद्युगात् ।
आख्यातारश्च विद्यन्ते कुले चेद्विद्यते पुमान् ॥ ६८
उपगुह्य हि वैराणि सान्त्वयन्ति नराधिपाः ।
अथैनं प्रतिपिंषन्ति पूर्णं घटमिवाश्मनि ॥ ६९
सदा न विश्वसेद्राजन्पापं कृत्वेह कस्यचित् ।
अपकृत्य परेषां हि विश्वासाद्दुःखमश्नुते ॥ ७०

---

time) M2 रसज्ञा. D7 G1 (first time). 2. 5 तस्य ; T1. 2 (both times) G1 (second time) M (M4 first time) स्वस्य (for सर्व-). Da -भूतस्य ; D9 -दुःखानां. — After 62, G1 reads 35.

63 a) M1. 3 महाराजंस्. — b) T2 G1 तथा (for त्वया). T2 G1 तत् (for यत्). — c) K3 च (for तद्). — d) D7 S (except M2 ; G3. 4 absent) अपोहितुम् (for व्यपो°). D4 G1 अरिंदमः.

64 a) T2 G1 आवाभ्यां (for आवयोः). M2 अन्योन्ये. — b) K2. 5 B4 Dn1 n3 D2. 3. 5. 8 पुनः ; D7 S (G3. 4 absent) तस्य ; D9 अत्र (for तत्र). — D8 G2 om. (hapl.) 64c–65d. — c) Da1 हि तं ; D4 हंत ; D9 हतं (for हि ते). — d) K4 Da न वै ; B1 नव- ; D4 न च ; M2 न वा (for नवं).

65 D8 G2 om. 65 (cf. v. l. 64). — a) Ś1 K1. 2. 4 D1. 5 अंतकम् ; T2 G1 अत्यंतम् (for अन्तिकम्). K3. 5 V1 B0–2 Da Dn1. n3 D2–4. 7. 9 T1 G5 आसाद्य (for आसज्य). D5 वैरमात्यंतिकासह्यं. — b) B3 अच्छेति ; B4. 5 अर्हति (for इच्छति). — c) D4 मृन्मनस्य ; T2 G1 मृण्मयस्य. G5 [ए]व (for [इ]व). M2 चंद्रस्य (for भग्नस्य). D9 m पक्वभांडस्य भग्नस्य. — d) K2. 3. 5 B (except B0) Dn1. n3 D2. 3. 5 यथा (for तस्य).

66 a) D4 निश्चयश् (for निश्चितश्). D1 चाथ (for चार्थ-). K2. 5 V1 B1. 2 Da Dn1. n3 D2. 3. 7. 8 S (G3. 4 absent) निश्चयश्चा(K2. 5 Dn1. n3 D2. 3. 8 G2 °यः स्वा- ; T2 G1 °यज्ञा- ; M2 °यं चा)र्थशास्त्रेषु ; D5 निश्चितार्थार्थतत्त्वज्ञैर् ; D9 °तस्यार्थतत्त्वज्ञैर्. — b) B0. 3. 4 D5. 7 S (G3. 4 absent) न विश्वासः (for अवि°). G1 सुखोदयं. K2. 5 Dn1. n3 D2. 3. 8 विश्वासश्चासुखोदयः. — c) K (except K4) B0. 3–5 Dn1. n3 D2–5. 8. 9 चैव ; V1 B1. 2 Da द्वे तु ; D7 T1 G1. 2. 5 M त्वथ ; T2 चाह (for चाथ). V1 B1. 2 Da वै (for द्वे). — d) Some MSS. प्रह्लादाय. Da तदा (for पुरा).

67 a) B4 damaged. Ś1 K1. 4 D1 वैरिणं ; K3 D9 M1. 3 °णि (for °णः). B1. 2 श्रद्दधति ; M4 °धंते. ❀ Cn : वैरिणः, वाक्ये इति शेषः । ❀ — b) D5 om. सत्ये. D4 सत्येसत्ये परेपरे. — c) D9 तैः (for ते). K4 बध्यंते (for वध्यन्ते). K2. 5 V1 B1. 2 Da Dn1. n3 D2. 3. 7. 8 S (G3. 4 absent) वध्यं(T1 पच्यं)ते श्रद्दधानास्तु (B1. 2 Da °नास्ते ; D7 T G1. 2. 5 M1–3 °ना हि ; M4 °नाश्च). — d) B1 शुष्कैस् (for शुष्क-). D7 S (G3. 4 absent) इव (for यथा). ❀ Cv : शत्रुणा दर्शितं पुरःस्थितं मधु श्रद्दधानाः शुष्कतृणैश्छन्ने प्रपाते यथा पतन्ति तद्वदेतदित्यर्थः । ❀

68 =(var.) 5. 70. 62. G2 om. 68. — a) B1. 2 Da शाम्यंते. — b) K3. 5 Dn1. n3 D2. 3. 5. 8 कुले दुःखगतानि च ; Da कुलेष्वा दशमाद्युयात्. — c) B2 व्याख्यातारश्च ; Da1 आख्यातारस्य. — d) K5 B4. 5 Dn1. n3 D2. 3. 8 वै ध्रियते ; V1 B1. 2. 5 Da चेद्ध्रियते ; D4 वै विद्यते ; D7 T G1. 5 चेज्जायते ; M वै जायते (for चेद्विद्यते). D4 सुतान् (for पुमान्).

69 D5 om. 69. — a) K3 D1. 9 उपगूह्य ; K4. 5 V1 B Da Dn1. n3 D2–4. 8 उपगृह्य ; D7 S (G3. 4 absent) उपा(D7 T1 G5 अपा- ; G4 उप)कृत्य (for उपगुह्य). K5 V1 B1. 2. 4 Da Dn1. n3 D2. 3. 8 तु (for हि). — b) K2 Dn1 नराधिप ; B2 °धिपः. — c) Ś1 K1. 2. 4 [ए]कं ; B1. 2 [ए]तं (for [ए]नं). B0. 3–5 D7 T G2. 5 M -हिंसंति ; G1 lacuna (for -पिंषन्ति). — d) B2 D4. 9 कुंभम् (for घटम्). M1. 3 [आ]त्मनि (for [अ]श्मनि).

70 a) K5 V1 B (B4 damaged) Da Dn1. n3

ब्रह्मदत्त उवाच ।

नाविश्वासाच्चिन्वतेऽर्थान्नेहन्ते चापि किंचन ।
भयादेकतरान्नित्यं मृतकल्पा भवन्ति च ॥ ७१

पूजन्युवाच ।

यस्येह व्रणिनौ पादौ पद्भ्यां च परिसर्पति ।
क्षण्येते तस्य तौ पादौ सुगुप्तमभिधावतः ॥ ७२
नेत्राभ्यां सरुजाभ्यां यः प्रतिवातमुदीक्षते ।
तस्य वायुरुजात्यर्थं नेत्रयोर्भवति ध्रुवम् ॥ ७३
दुष्टं पन्थानमाश्रित्य यो मोहादभिपद्यते ।
आत्मनो बलमज्ञात्वा तदन्तं तस्य जीवितम् ॥ ७४
यस्तु वर्षमविज्ञाय क्षेत्रं कृषति मानवः ।
हीनं पुरुषकारेण सस्यं नैवाप्नुते पुनः ॥ ७५
यश्च तिक्तं कषायं वाप्यास्वादविधुरं हितम् ।
आहारं कुरुते नित्यं सोऽमृतत्वाय कल्पते ॥ ७६

C. 12. 5213
B. 12. 139. 80
K. 12. 139. 81

D2. 3. 5. 8 राजा (for राजन्). — c) D5 अपहृत्य (for °कृत्य). Dn3 च (for हि). — d) K3 D4. 9 M3 आप्नुयात्; D7 T G1. 2. 5 M1. 2. 4 आप्नुते (for अश्नुते).

71 a) Ś1 K1 न विश्वासश्च; K4 नाविश्वासाश्च; D1. 4 न विश्वासाच् (for नाविश्वासाच्). K3 D4 T1 G2. 5 M चिनोति; K5 V1 B1. 3. 4 Da2 Dn1. n3 D2. 3. 5. 8 विंदते; D7 G1 छिनोति (for चिन्वते). B1. 3 ह्यर्थान्; T1 G1. 2. 5 M1. 3 अर्थं (for ऽर्थान्). Bo. 5 विश्वासाद्विंदते ह्यर्थान्; B2 Da1 ना(Da1 न)विश्वासार्थिनो(Da1 °ना)त्यर्थान्; T2 विश्वासाद्विद्धि नोत्यर्थान्. — b) K5 Dn3 D2 ईहते; Dn1 D3. 8 ईहंते (for नेहन्ते). D1 वापि. K3 D4 न वापीहत किंचन; V1 B1. 2 न चापीहंति किं°; Bo. 3–5 ईहते च कथंचन; Da2 या वाचापीति किंचन; D7 S (G3. 4 absent) न चापीह(T2 °प्यहं)ति किंचन (G2 M कश्चन); D9 नाहं नैवापि किं°. — c) Ś1 K1–4 D1. 4. 5 भयं (for भयाद्). Ś1 K1. 2 D1. 5 त्वेकवशं; K3 B1 T2 M त्वेकतरं; B3. 5 चैकतरान्; Da T1 G5 वैकतरान्; D5 न कतरं; D7 G2 चैकतरं; D9 त्वेकरतं; G1 चैव करं (sic) (for एकतरान्). D7 S (G3. 4 absent) मित्रं (for नित्यं). ✿ Cv (reading प्रयात्वेकतरं मित्रे): मित्रे मयि एकतरं अर्थसंचयं वा तूष्णीमवस्थानं वा भवती प्रयातु । ✿ — d) D7 S (G3. 4 absent) Cv कृतकृत्या (for मृतकल्पा). D7 T G1. 2. 5 भव(T2 G2 °वं)त्विह (for °न्ति च).

72 D1. 7 G2 om. the ref. Ś1 K1. 4 पूतनी (for पूजनी). — a) D9 हि (for [इ]ह). V1 B1. 2 Da D9 T1 G2. 5 व्रणितौ; D1 व्रजिनौ; D7 G1 प्रणितौ; T2 प्रणतौ; M2 प्रतितो (sic) (for व्रणिनौ). — b) V1 Bo. 3. 5 वि- (for च). K3 B1. 2 Da D4 -धावति; D7 T1 G1. 2. 5 M -धावतः; D9 -सर्पभिः (sic); T2 -भावतः (for -सर्पति). — c) K3 D4 क्षिणोति; K4 स्त्वण्येते (sic); K5 V1 B Da Dn1. n3 D2. 3. 5. 8 खन्येते; D1 क्षायिते; D7 T2 M2–4 क्षिण्येते; D9 क्षणिनौ; T1 G1. 2. 5 क्षुण्ये(G1 °प्य)ते (for क्षण्येते). Da वै पादौ; D7 T2 पादौ तौ (by transp.). — d) K3 V1 B1. 2 Da Dn1 D4 सुगुप्तान् (for °प्तम्). K5 B4 Dn3 D1–3. 8 इह; V1 Bo–3. 5 Da Dn1 D7. 9 T G1. 2. 5 अपि; D4 अति-; D5 इव (for अभि-).

73 a) D5 सरजोभ्यां; M2 सुरुजाभ्यां. — b) Da1 प्रतिवाचम्; G1 °यातम्; G2 °घातम्; M1. 3 प्रत्यादित्यं; M2. 4 प्रतिपादम् (for °वातम्). Ś1 उद्वीक्षते; M1–3 निरी° (for उदी°). — c) Dn1 D8 वायू; D5 वाशु; M चापि (for वायु-). K1 [अ]त्यक्तं; Da D7 S (G3. 4 absent) नित्यं (for [अ]त्यर्थं). — d) B1. 2 ध्रुवा.

74 a) Da दुष्ट-; G1 M3 दृष्टं. K2. 5 V1 B1. 2 Da Dn1. n3 D2. 3. 7. 8 T G1. 2. 5 आसाद्य (for आश्रित्य). — b) K2. 3. 5 Dn1. n3 D2–4. 8. 9 उप- (for अभि-). K3 D4. 9 -गच्छति (for -पद्यते). — c) K2. 3. 5 V1 B D (except D9; Dn2 D6 absent) T1 G5 M4 अज्ञा(D5 °दा)य; M2 आज्ञाय (for अज्ञात्वा). — d) M2 जनितं (for तदन्तं).

75 D5 om. (hapl.) 75a–76b. — a) K3 D4. 9 च (for तु). D9 T2 कर्षम् (for वर्षम्). D1 अभिज्ञाय. — b) K1 कृशति; K2–5 V1 B (except B3) D (except D9; D5 om.; Dn2 D6 absent) T G2. 5 M कर्षति; G1 वर्षति (for कृषति). K2 Da कर्षकः (for मानवः). — c) K (except K1) B2–4 Da Dn1. n3 D2. 3. 7–9 S (G3. 4 absent) हीनः (for हीनं). M2 पुरुषकारैश्च. — V1 reads 75d–77d on marg. — d) B1 शस्यं; K2. 5 M4 सस्यान्. D1 वैव; M वै न (for नैव). M2 [अ]प्सते V1 Bo. 2. 4 Da Dn3 D2. 3. 8 [अ]श्नुते; K2. 5 V1 B Da Dn1. n3 (sic) (for [आ]प्नुते). D7 T G1. 2. 5 तस्य वै D2–4. 8. 9 M ततः (for पुनः). नाप्नुते फलं.

76 D5 om. 76ab (cf. v. l. 75). V1 reads 76 on marg. — a) K2. 5 V1 B Da Dn1. n3 D2–4. 8. 9

C 12. 5214
C. 12. 139. 81
K. 12. 139. 81

पथ्यं भुक्त्वा नरो लोभाद्यो ऽन्यदश्नाति भोजनम् ।
परिणाममविज्ञाय तदन्तं तस्य जीवितम् ॥ ७७

दैवं पुरुषकारश्च स्थितावन्योन्यसंश्रयात् ।
उदात्तानां कर्म तत्त्रं दैवं क्लीबा उपासते ॥ ७८

कर्म चात्महितं कार्यं तीक्ष्णं वा यदि वा मृदु ।
ग्रस्यते ऽकर्मशीलस्तु सदानर्थैरकिंचनः ॥ ७९

तस्मात्संशयिते ऽप्यर्थे कार्य एव पराक्रमः ।
सर्वस्वमपि संत्यज्य कार्यमात्महितं नरैः ॥ ८०

विद्या शौर्यं च दाक्ष्यं च बलं धैर्यं च पञ्चकम् ।
मित्राणि सहजान्याहुर्वर्तयन्तीह यैर्बुधाः ॥ ८१

निवेशनं च कुप्यं च क्षेत्रं भार्या सुहृज्जनः ।
एतान्युपचितान्याहुः सर्वत्र लभते पुमान् ॥ ८२

सर्वत्र रमते प्राज्ञः सर्वत्र च विरोचते ।
न विभीषयते कंचिद्भीषितो न बिभेति च ॥ ८३

नित्यं बुद्धिमतो ह्यर्थः स्वल्पको ऽपि विवर्धते ।
दाक्ष्येण कुरुते कर्म संयमात्प्रतितिष्ठति ॥ ८४

T G2. 5 M यस्तु; K3 यश्च; D7 G1 वस्तु (for यश्च). D4. 9 त्यक्तं; T2 तिक्त-. D9 कषायं. — b) K1. 4 D4. 9 [अ]प्यास्वादु; K2. 5 V1 B Da Dn1. n3 D2. 3. 8 स्वादु वा; D7 S (G3. 4 absent) ह्यास्वा(M2 °पा)द्य (for [अ]प्यास्वाद-). K1 -विपुलं; K2. 4. 5 V1 B D (D5 om.; Dn2 D6 absent) S (G3. 4 absent) मधुरं (for -विधुरं). M4 कृतं (for हितम्). — c) D4 आहाराः; D9 आकारं.

77 V1 reads 77 on marg. — a) K3 D9 त्यक्त्वा; K5 V1 B0 Da Dn1 D3. 4. 8 M1. 3. 4 भुक्त्वा; D5 कृत्वा; M2 मत्वा (for भुक्त्वा). K1 परो लोभाद्; K5 V1 B1. 2 Da Dn1. n3 D2. 3. 8 तु यो मोहाद्; D7 T G1. 2. 5 M1–3 नरो योन्यो (G2 M1–3 °न्यल्); M4 नरोन्योन्यं (for नरो लोभाद्). — b) K5 Dn1. n3 D2. 3. 8 दुष्टम्; V1 B1. 2 Da अन्यद्; D7 S (G3. 4 absent) लोभाद् (for योऽन्यद्). — c) G1. 2 परिमाणम्; M4 परीणामम्. — d) D1 उदक्यं (sic) (for तदन्तं).

78 a) D7 T2 M4 पुरुषकारं. — b) D1 -संशयात्; G2 -संश्रयः. — c) K1. 5 V1 B2 Da Dn1. n3 D2. 3. 8 उदाराणां; K2 D1 तदात्ता(D1 °दंता)नां; K3 D4 उद्यतानां; K4 तदांतानां; B0. 1. 3–5 D5 उत्तमानां (for उदात्तानां). K5 Dn1. n3 D2. 3. 8 तु सत्कर्म; V1 B1. 2 Da कर्म तत्र; B0. 3–5 तत्र कर्म (for कर्म तत्त्रं). D7 S (G3. 4 absent) उदात्तं कर्म वै तत्र. — d) V1 Da क्लैब्याद्; B4 क्रीडा; D1 क्लीब; Cv किं वा (for क्लीबा).

79 a) B1 चात्र; D4 वात्म-; T2 चार्य- (for चात्म-). — 79cd damaged in B4. — c) K4 गम्यते; Da ग्रसते; G2 गृह्यते (for ग्रस्यते). M4 -शीलं. B2 च (for तु). — d) Dn3 सदानार्थैर्.

80 a) B0. 5 तत्र; B3 ततः (for तस्मात्). K4 [अ]र्थे. K1 V1 B1. 2 Da D7 S (G3. 4 absent) तस्मात्संश(G2 तस्मात्साध)यितव्येर्थे (B1. 2 Da °व्यार्थे); K5 Dn1. n3 D2. 3. 8 तस्मात्सर्वं व्यपोह्यार्थं; D5 ततः प्रशमितेप्यर्थे. — d) Da2 आत्महितैर्.

81 a) K3 V1 विद्यां. T1 G1. 2. 5 M शौचं; T2 धैर्यं (for शौर्यं). D2 दक्ष्यं (for दाक्ष्यं). D9 ते (for the second च). — b) B4 चैश्वर्य-; Dn3 धर्म्यं च; D7 S (G3. 4 absent) शौर्यं च (for धैर्यं च). — D4 om. (hapl.) 81d–82c. — d) K1 वर्धयंति; T2 विजं (for वर्त°). K2. 3 D2 ते; K5 Dn1. n3 D3. 8 तैर्; B1 Da ये (for यैर्). D1 बुधः.

82 D4 om. 82abc (cf. v. l. 81). — a) D9 न (for the first च). G2 कूप्यं. ❀ Cv: कुप्यमन्यद्धनं भवेदिति वचनाद्रूप्यहेमव्यतिरिक्तगोधान्यादि धनं कुप्यम् । ❀ — b) Da क्षेत्रभार्या; D7 T1 G1. 2. 5 भार्या क्षेत्रं; T2 M भार्या क्षेत्रं (by transp.). K4. 5 V1 B1 Da D1 सुहृज्जनाः; B0. 3–5 °त्तमः; D7 T1 G1. 2. 5 M2 °ज्जनं (for °ज्जनः). — c) B4 damaged from चिता up to रमते (in 83a). K1. 3. 5 V1 B1. 2. 5 Dn1. n3 D2. 3. 7–9 T1 G5 Cn उपहितानि; B4 प्रिय***; Da1 अपहितानि; Da2 अपगतानि; D4 प्रियहितानि (for उपचितानि). D9 आज्ञु (for आहुः). B0. 3 एतान्प्रियहितान्प्राज्ञः. — D9 om. (hapl.) 82d–83a.

83 B4 damaged up to रमते. D9 om. 83a (cf. v. l. 82). — a) K1 प्राज्ञ. — b) K2. 5 Dn1. n3 D2–5. 8. 9 विराजते (for विरोचते). — c) Da D4. 5. 7. 9 S (G3. 4 absent) च (for वि-). K3 V1 B2 Da D4. 7. 9 T G1. 2. 5 किंचिद्; K5 B0. 1 Dn1. n3 D2. 3. 5. 8 कश्चिद् (for कंचिद्). — d) D1 भीषतो; D7 भीषते (for भीषितो). G1 बिभेद (for °ति).

84 a) D9 बुद्धिमतौ; M1 °द्वतो. K5 V1 B1. 2 Da Dn1. n3 D2. 3. 8 [ऽ]पि (for हि). — b) K4 स्वर्गको;

गृहस्नेहावबद्धानां नराणामल्पमेधसाम् ।
कुस्त्री खादति मांसानि माघमा सेगवामिव ॥ ८५
गृहं क्षेत्राणि मित्राणि स्वदेश इति चापरे ।
इत्येवमवसीदन्ति नरा बुद्धिविपर्यये ॥ ८६
उत्पतेत्सरुजाद्देशाद्व्याधिदुर्भिक्षपीडितात् ।
अन्यत्र वस्तुं गच्छेद्वा वसेद्वा नित्यमानितः ॥ ८७
तस्मादन्यत्र यास्यामि वस्तुं नाहमिहोत्सहे ।
कृतमेतदनाहार्यं तव पुत्रेण पार्थिव ॥ ८८

कुभार्यां च कुपुत्रं च कुराजानं कुसौहृदम् ।
कुसंबन्धं कुदेशं च दूरतः परिवर्जयेत् ॥ ८९
कुमित्रे नास्ति विश्वासः कुभार्यायां कुतो रतिः ।
कुराज्ये निर्वृतिर्नास्ति कुदेशे न प्रजीव्यते ॥ ९०
कुमित्रे संगतं नास्ति नित्यमस्थिरसौहृदे ।
अवमानः कुसंबन्धे भवत्यर्थविपर्यये ॥ ९१
सा भार्या या प्रियं ब्रूते स पुत्रो यत्र निर्वृतिः ।
तन्मित्रं यत्र विश्वासः स देशो यत्र जीव्यते ॥ ९२ C. 12. 5229 B. 12. 139. 96 K. 12. 139. 97

D_1 स्वगतो (for स्वल्पको). D_5 वादि (sic) (for ऽपि वि-). $D_{4,9}$ विवर्धत (D_9 °तैः). — [c]) B_{1-4} Da Dn_3 $D_{1,3,8,9}$ दाक्षेण (D_1 °न). $K_{1,3}$ V_1 B_{0-4} $D_{4,9}$ M_2 कुर्वतः ; K_5 B_5 Da $Dn_{1,\,n3}$ $D_{2,3,5,8}$ [अ]कुर्वतः ; D_7 T $G_{1,2,5}$ $M_{1,3,4}$ कुर्वतां (T_2 °ता) (for कुरुते). — [d]) B_2 संशयात् ; D_4 संयमान् (for °मात्). $K_{1,3}$ V_1 $B_{1,2}$ Da D_9 प्रतितिष्ठतः.

85 [a]) T_2 श्रृणु (for गृह-). D_1 -स्नेहस्व- ; D_4 -स्नेहा च (for -स्नेहाव-). Da -रुद्धानां (for -बद्धानां). — [b]) D_1 -मित्रसां (sic) ; T_2 -चेतसां (for -मेधसाम्). — [c]) Da_2 षादति. — With 85[d], cf. 6. 114. 60 and note. B_4 damaged for 85[d]–86[a]. — [d]) K_1 D_1 माघो मा ; K_5 $Dn_{1,\,n3}$ माघमां (for माघमा). K_1 सोघवान् ; K_2 Dn_1 D_9 सो(Dn_1 शौ)गवाम् ; $K_{3,5}$ Dn_3 $D_{2,3,8}$ सेगवा (for सेगवाम्).

86 B_4 damaged for 86[a]. — [a]) $B_{1,2}$ Da_1 D_5 गृह- ; B_3 गृही (for गृहं). — [b]) Ś$_1$ $K_{1,2,4}$ $D_{1,4}$ स्वदेह ; M_2 °शम् (for °देश). D_1 om. from चापरे up to नित्य (in 87[d]). — [d]) D_9 मति- (for बुद्धि-).

87 D_1 om. up to नित्य (cf. v. l. 86). V_1 reads 87–91 on marg. — [a]) B_1 उत्पातात् (for उत्पतेत्). V_1 B_{1-3} Dn_1 सहजाद् ; T_2 सरुताद् (for °जाद्). D_5 उत्पद्यते रुजा व्याधिर् ; D_7 T_1 $G_{1,2,5}$ उत्पथाच्च विमानाच्च. — [b]) D_7 T_1 $G_{1,2,5}$ देशाद् (for व्याधि-). Dn_3 $M_{2,4}$ -पीडितान् ; T_2 -पीडनात्. D_5 दुर्भिक्षाच्चैव पीडितान्. — [c]) K_3 $D_{4,9}$ रोचेत (for गच्छेद्वा). D_7 S ($G_{3,4}$ absent) अन्यत्र वसतिं (T_2 M_{1-3} °सितुं) गच्छेद्. — [d]) Ś$_1$ $K_{1,2,4}$ D_1 -मन्यतः (D_1 °ता) (for -मानितः).

88 V_1 reads 88 on marg. — [a]) Ś$_1$ K_4 D_1 गच्छामि (for यास्यामि). — [b]) D_1 नार्यम् (for नाहम्). — [c]) K_3 एव (for एतद्). K_3 तदाकार्यं ; K_5 V_1 $Dn_{1,\,n3}$ $D_{2,3,8}$ अनार्यं मे (for अनाहार्यं). — [d]) K_5 $Dn_{1,\,n3}$ $D_{1-3,8}$ पुत्रे च (for पुत्रेण). D_1 पार्थिवः.

89 V_1 reads 89 on marg. — [a]) Ś$_1$ $K_{1,4}$ V_1 $B_{1,2}$ $D_{1,4,9}$ कु(B_2 स)मित्रं (for कुपुत्रं). — [b]) V_1 $B_{1,2}$ Da कुसंबंधं (for कुराजानं). — [c]) V_1 $B_{1,2}$ Da कुराजानं (for कुसंबन्धं). D_7 T_1 $G_{1,2,5}$ कुदेशं च कुसंबंधं.

90 V_1 reads 90 on marg. — [a]) $K_{1-3,5}$ V_1 Da $Dn_{1,\,n3}$ $D_{2,3,5,7,9}$ T_1 G_5 कुपुत्रे (for कुमित्रे). — [b]) K_3 D_9 सुखं (for रतिः). — [c]) V_1 $B_{0,5}$ $M_{1,3,4}$ °ज्ञे (for °ज्ये). D_7 T_1 कुराज्ञि ; T_2 °ष्ट्रे ; $G_{1,2,5}$ कुराजनि धृतिर्नास्ति. — [d]) K_1 D_7 S ($G_{3,4}$ absent) प्रजीवति ; $K_{3,5}$ V_1 B Da $Dn_{1,\,n3}$ $D_{2,3,5,8}$ [अ]स्ति जीविका ; K_4 lacuna ; D_9 च जीव्यते (for प्रजी°). — After 90, Ś$_1$ $K_{2,4}$ D_1 read 93.

91 V_1 reads 91 on marg. — [a]) Ś$_1$ (*sup. lin.*) $K_{1,2,5}$ V_1 B Da $Dn_{1,\,n3}$ $D_{2,3,5,8}$ कुपुत्रे (for कुमित्रे). D_1 संव्रतं (for संगतं). D_7 S ($G_{3,4}$ absent) कुपुत्रे सौहृदं नास्ति. — [b]) K_4 -सौहृदं. — [c]) K_1 B_2 अवमानं ; V_1 $B_{0,4,5}$ $D_{1,5}$ M_1 अपमानः (for अव°). — [d]) K_1 अर्थं ; D_2 अर्थो (for अर्थ-).

92 [a]) K_3 Da G_1 स ; Dn_3 स्व- (for सा). G_1 M_3 याः. D_9 वक्ति (for ब्रूते). — [b]) G_1 सुपुत्रो ; M_4 सपुत्रे. T_2 स पुत्रो यस्तु सुव्रतः. — [c]) D_4 यश्च (for यत्र). — [d]) K_3 B_0 D_7 S ($G_{3,4}$ absent) जीवति (for जीव्यते).

93 Ś$_1$ $K_{2,4}$ D_1 read 93 after 90. — [a]) V_1 यस्य (for यत्र). — [b]) D_4 न (for स). D_7 -शासकः (for °नः). — [c]) K_5 $B_{3,4}$ $Dn_{1,\,n3}$ $D_{2,3,8}$ भीरेव ; V_1 B_0. D_4 सदैव ; D_5 भीरो च ; D_7 स $_{2,5}$ Da D_9 स चैव ;

C. 12. 5230
B. 12. 139. 97
K. 12. 139. 98

यत्र नास्ति बलात्कारः स राजा तीव्रशासनः ।
न चैव ह्यभिसंबन्धो दरिद्रं यो बुभूषति ॥ ९३
भार्या देशोऽथ मित्राणि पुत्रसंबन्धिबान्धवाः ।
एतत्सर्वं गुणवति धर्मनेत्रे महीपतौ ॥ ९४
अधर्मज्ञस्य विलयं प्रजा गच्छन्त्यनिग्रहात् ।
राजा मूलं त्रिवर्गस्य अप्रमत्तोऽनुपालयन् ॥ ९५
बलिषड्भागमुद्धृत्य बलिं तमुपयोजयेत् ।
न रक्षति प्रजाः सम्यग्यः स पार्थिवतस्करः ॥ ९६
दत्त्वाभयं यः स्वयमेव राजा
न तत्प्रमाणं कुरुते यथावत् ।
स सर्वलोकादुपलभ्य पाप-
मधर्मबुद्धिर्निरयं प्रयाति ॥ ९७
दत्त्वाभयं यः स राजा प्रमाणं कुरुते सदा ।
स सर्वसुखकृज्ज्ञेयः प्रजा धर्मेण पालयन् ॥ ९८
पिता माता गुरुर्गोप्ता वह्निर्वैश्रवणो यमः ।
सप्त राज्ञो गुणानेतान्मनुराह प्रजापतिः ॥ ९९
पिता हि राजा राष्ट्रस्य प्रजानां योऽनुकम्पकः ।
तस्मिन्मिथ्याप्रणीते हि तिर्यग्गच्छति मानवः ॥ १००

भूयान् (for न चैव). K1 D1 ह्यति-; K5 V1 Bo. 3-5 Dn1. n3 D2-5. 8. 9 नास्ति; B2 Da [अ]नभि-; D7 अपि (for ह्यभि-). K1 D1 -संबंधं. B1 स वैवस्ति का युद्धे (sic); S (G3. 4 absent) स च यौनाभि(T2 यो नापि; M1. 3 यौनोभि-; M4 यौनो हि)संबंधो. — d) D7 S (G3. 4 absent) यं ज(M1. 3 यज्ञ)नोपि (for दरिद्रं यो). K5 Dn1. n3 D2. 3. 8 बुभूषते; D7 विभूषति (for बुभू°). ❀ Cn: बुभूषति पालयितुमिच्छति । ❀

94 a) K4 देशे च; B3 देशार्थ-; B4 Da देशोर्थ-; D1 ह्यशेष- (for देशोऽथ). — b) Da -मानवाः (for -बान्धवाः). — c) K2. 3. 5 B4 Dn1. n3 D2-4. 7-9 S (G3. 4 absent) एते सर्वे; Da D6 एतत्सर्वे (for °र्वं). — d) Bo. 1. 3-5 धर्मनित्ये; D5 °निष्ठे (for °नेत्रे).

95 a) D2. 7. 8 S (G3. 4 absent) विषये (D2. 8 °यं) (for विलयं). D4 अधर्मस्य प्रणयने. — b) D4 लयं (for प्रजा). K3 V1 Bo-3 Da D5. 9 गच्छति; D7 S (except T2; G3. 4 absent) नश्यंति (for गच्छन्ति). K4. 5 B4. 5 Dn1 D3. 7 S (G3. 4 absent) नि(M2. 3 वि)ग्रहात्; D4 अकारणे; D9 अविग्रहात् (for अनि°). — c) D1 राजमूले. — d) Ś1 K (except K3) V1 B1. 2. 4 Dn1. n3 D2. 3. 5. 8. 9 स्वप्रमत्तो; Bo. 5 ह्यप्र°; D4 योप्र° (for अप्र°). K3. 5 B2 Dn1. n3 D2-4. 8 [ऽ]नु(D4 °भि)पालयेत् (for °यन्).

96 a) D4. 5 बलिं; D7 बली; M2 बंधु- (for बलि-). — b) K1 बलं; D7 S (except M2; G3. 4 absent) फलं (for बलिं). K5 Da Dn1. n3 D2. 3. 8 समुप-; D7 S (G3. 4 absent) तदुप- (for तमुप-). K2 D1. 9 M1. 3 -योजयन् (for °येत्). K3 B1. 2 बलिमामुपयोजयेत् (B1 °यन्); V1 Bo. 3-5 D5 बलिभागुपयोजयेत् (V1 °यन्). — c) V1 रक्ष्यति; D7 रक्षंति. — d) Da1 यश्च; D7 T G1. 5 स च (for यः स). Da पापश्च (for पार्थिव-). Dn3 -तत्त्वतः (for -तस्करः). D5 यः स कुत्सितपार्थिवः.

97 B1 om. (hapl.) 97. — b) K5 B2 Dn1. n3 D2. 3. 7. 8 S (G3. 4 absent) [ऽ]र्थलोभात्; V1 Da च (V1 [ऽ]त्र) लोभात्; D9 [ऽ]प्ययथावत् (for यथा°). — c) K1 सर्वलोकान्; G2 धर्मलोभाद्. — d) K5 B4 Dn1. n3 D1-3. 5. 8. 9 सो(D1 स)धर्म- (for अधर्म-). Ś1 K1 D1 -बुद्धिं (for -बुद्धिर्).

98 a) K1 यः स; K3. 5 V1 B1. 2 D (Dn3 D6 absent) S (G3. 4 absent) स्वयं; Bo. 3-5 स यो (for यः स). — b) D1 प्रसादं (for प्रमाणं). K2. 5 V1 B1. 2 Da Dn1. n3 D2. 3. 8 यदि; D7 तदा; T1 G1. 5 यदा; M च यः (for सदा). — c) K1 corrupt; V1 B1. 2 Da -सु(B2 -दुः)खभाज् (for °कृज्). K1 ज्ञेयाः; B1 क्षेमः; B3. 4 D5 प्राज्ञः (for ज्ञेयः). D7 S (G3. 4 absent) स सर्वं (T2 G1. 2 M2 °र्वे-) सुखमाप्नोति. — d) K3 पालयेत्. D2. 8 प्रजा धर्मे प्रपालयन्.

99 a) K3. 5 V1 B1. 2 Da Dn1. n3 D2-4. 8. 9 माता पिता (by transp.); D7 T1 G1. 2. 5 पिता भ्राता. D7 S (G3. 4 absent) शास्ता (for गोप्ता). — b) B1 वैश्रवणोपमः. — c) K3 V1 B Da D5. 7. 9 S (G3. 4 absent) राज-; D4 राज्ञां (for राज्ञो). — d) K1 (marg.) विभुर् (for मनुर्).

100 a) M2 [अ]सि (for हि). T2 राज- (for राजा). D7 S (G3. 4 absent) लोकस्य (for राष्ट्रस्य). — b) K3. 5 Da Dn1. n3 D2. 3. 5. 8 M1 -कंपनः; D1 -केलकः (sic); D7 T1 G1. 2. 5 -कंपिता (for -कम्पकः). — c) K5 V1 B1. 2 Da Dn1. n3 D2. 3. 8 M -विनीतो;

संभावयति मातेव दीनमभ्यवपद्यते ।
दहत्यग्निरिवानिष्टान्यमयन्भवते यमः ॥ १०१
इष्टेषु विसृजत्यर्थान्कुबेर इव कामदः ।
गुरुर्धर्मोपदेशेन गोप्ता च परिपालनात् ॥ १०२
यस्तु रञ्जयते राजा पौरजानपदान्गुणैः ।
न तस्य भ्रश्यते राज्यं गुणधर्मानुपालनात् ॥ १०३
